षष्ठः पाठः

# संस्कृतसाहित्ये पर्यावरणम्

[अधुना वैज्ञानिके युगे यदा प्रकृतिः असन्तुलिता जाता तदा पर्यावरणस्य चर्चा भवति। कथं प्रदूषणं दूरीकरणीयम्, प्रकृतिः सन्तुलिता भवेत्, पशुपक्षिणः स्वस्वरूपेषु स्थिता भवन्तु, मानवश्च शुद्धं जलं वायुं च लभेत, जीवनं च कल्याणमयं स्यादिति प्रश्नः भूयोभूयः सर्वान् आन्दोलयति। संस्कृतसाहित्ये नेयमवस्था आसीदिति पाठेऽस्मिन् संक्षेपेण आदर्शरूपस्य पर्यावरणस्य निरूपणं वर्तते।]

**भूमिर्जलं नभो वायुरन्तरिक्षं पशुस्तृणम् ।**
**साम्यं स्वस्थत्वमेतेषां पर्यावरणसंज्ञकम् ॥**

संस्कृतसाहित्यस्य महती परम्परा संसारस्य सर्वान् विषयानूरीकृत्य प्रचलिता। प्रकृतिसंरक्षणं पर्यावरणस्य संतुलनं वा तत्र स्वभावतः उपस्थापितमस्ति। वैदिककाले प्रकृतेरुपकरणानि देवरूपाणि प्रकल्पितान्यभवन्। पर्जन्यो वेदे इत्थं स्तूयते–

**इरा विश्वस्मै भुवनाय जायते**
**यत्पर्जन्यः पृथिवीं रेतसावति ।**

मेघः पृथिवीं जलेन रक्षति तदा सर्वेभ्यः अन्नं भवति। एवमेव ये वनस्पतयः फलयुक्ता अफला वा, पुष्पवन्तः अपुष्पा वा सर्वेऽपि ते मानवान् रक्षन्तु, पापानि अर्थात् मलानि दूरीकुर्वन्तु–

**याः फलिनी या अफलाः अपुष्पा याश्च पुष्पिणीः ।**
**बृहस्पति-प्रसूतास्ता नो मुञ्चन्त्वंहसः ॥**

अत्र ओषधयो देव्यः स्तूयन्ते।

संस्कृतकाव्येषु प्रकृतिवर्णनम् आवश्यकं विद्यते। कथ्यते यत् ऋतुः, सागरः, नदी, सूर्योदयः, सन्ध्या, चन्द्रोदयः, सरोवरः, उद्यानम्, वनम्- इत्यादीनि उपादानानि अवश्यं वर्णनीयानि भवन्ति महाकाव्ये। वाल्मीकिः सरोवरश्रेष्ठां पम्पां वर्णयति–

**नाना-द्रुमलताकीर्णां शीतवारिनिधिं शुभाम् ।**

**पद्मसौगन्धिकैस्ताम्रां शुक्लां कुमुदमण्डलैः ॥**

संस्कृतकाव्येषु स्वस्थपर्यावरणस्य कल्पनया स्वाभाविकरूपेण प्रवहन्तीनां नदीनां वर्णनं बाहुल्येन लभ्यते, जलप्लावनस्य वर्णनं तु विरलमेव। सूर्यतापित: ज्येष्ठमासस्य मध्याह्न: बाणभट्टेन वर्णित:। स च स्वाभाविक:। वस्तुत: स्वाभाविकरूपेण प्रवर्तमानानाम् ऋतूनां वर्णनेन पर्यावरणं प्रति कवीनामास्था दृश्यते। ग्रीष्मातपेन सन्तप्तस्य रक्षां वृक्षा: कुर्वन्ति इति प्रकृतिवरदानम्। अतएव मार्गेषु वृक्षारोपणं पुण्यमिति प्रतिपादितम्। फलवन्तो वृक्षास्तु परोपकारिण: इति कथयति नीतिकार:–

**स्वयं न खादन्ति फलानि वृक्षाः**

**स्वयं न वारीणि पिबन्ति नद्यः ।**

नरा कन्याश्च वृक्षान् प्रति ममताशीला इति शाकुन्तले नाटके वर्ण्यते। शकुन्तला वृक्षान् जलेन तर्पयित्वैव स्वयं जलं पिबति–

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या ।**

किं च भट्टि: शरत्काले जलाशयेषु कमलानां तद्वर्तिनां भ्रमराणां च वर्णनं करोति–

**न तज्जलं यन्न सुचारुपङ्कजं**

**न पङ्कजं तद् यदलीनषट्पदम् ।**

वसन्ते तु सर्वा प्रकृति: शोभनतरा भवति इति कालिदास: कथयति–

**द्रुमाः सुपुष्पाः सलिलं सपद्मं**

**सर्वं प्रिये चारुतरं वसन्ते ।**

कालिदास: पशूनां स्वाभाविकस्थिते: निरूपणमेव करोति–

**गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं**

**छाया-बद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।**

एवं प्राचीनभारते साहित्यकारा: सर्वस्यापि पर्यावरणस्य स्वस्थतां प्रति जागरूका अभवन्। कुत्रापि प्रकृते: असन्तुलनं न भवेत् इति प्रयासशीला: आसन्।

## शब्दार्थाः

| | | |
|---|---|---|
| **पर्यावरणम्** | प्राकृतिकवस्तूनां संतुलनम् | पृथिवी, जल, वायु आदि वस्तुओं (परितः आवरणम्)की साम्यावस्था |
| **अन्तरिक्षम्** | स्वर्गपृथिव्योः अन्तरम् | आकाश |
| **ऊरीवृत्य** | अंगीकृत्य | स्वीकार करके |
| **पर्जन्यः** | जलदः | बरसने वाला मेघ |
| **इरा** | पृथिवी (इं कामं राति इति) | धरती |
| **रेतसावति** | जलेन रक्षति | जल द्वारा रक्षा करता है |
| **फलिनीः** | फलयुक्ताः | फलों से परिपूर्ण |
| **अंहसः ( अंहस् + पञ्चमी )** | पापात् | पाप से |
| **द्रुमलताकीर्णां** | द्रुमैः लतामिश्च आकीर्णा (वृक्षलतापूर्णा) | वृक्षों और लताओं से भरी |
| **पद्मसौगन्धिकैः** | कमलसौरभैः | कमलों की सुगन्धों से |
| **कुमुदमण्डलैः** | कुमुदपुष्पसमूहैः | कुमुदिनी के फूलों से |
| **जलप्लावनस्य** | जलौघस्य, जलपूरस्य | बाढ़ का |
| **विरलम्** | दुर्लभम् | दुर्लभ, बहुत कम |
| **व्यवस्यति** | प्रयतते | प्रयास करता है |
| **अलीनषट्पदम्** | भ्रमरवियुक्तम् | भौरों से शून्य |
| **द्रुमाः** | वृक्षाः | पेड़ |
| **गाहन्तां** | निमज्जन्तु | डुबकी लगायें |
| **निपानसलिलं** | सरोवरजलम् | तालाब का पानी |
| **रोमन्थम्** | भुक्तग्रासचर्वणम् | जुगाली, पागुर |

## व्याकरणम्

### (क) संधिविच्छेदः–

| | |
|---|---|
| **पर्यावरणम्** | परि + आवरणम् |
| **नेयम्** | न + इयम् |
| **मुञ्चन्त्वंहसः** | मुञ्चन्तु + अंहसः |
| **प्रकल्पितान्यभवन्** | प्रकल्पितानि + अभवन् |
| **सौगन्धिकैस्ताम्रम्** | सौगन्धिकैः + ताम्रम् |
| **तर्पयित्वैव** | तर्पयित्वा + एव |
| **युष्मास्वपीतेषु** | युष्मासु + अपीतेषु |
| **यदलीनषट्पदम्** | यत् + अलीनषट्पदम् |
| **शृङ्गैर्मुहुस्ताडितम्** | शृङ्गैः + मुहुः + ताडितम् |

### (ख) व्युत्पतिः/ विग्रहः

| | | |
|---|---|---|
| **पर्यावरणम्** | – | परितः आवरणम् (परि + आ + Öवृ + ल्युट्) |
| **साम्यम्** | – | समस्य भावः (सम + ष्यञ्) |
| **ऊरीकृत्य** | – | ऊरी + Öकृ + ल्यप् |
| **द्रुमलताकीर्णा** | – | द्रुमैःलताभिश्च आकीर्णा (द्वन्द्वः, तृतीया तत्पुरुष) |
| **शीतवारिनिधिः** | – | शीतश्च असौ वारिनिधिः (कर्मधारय) |
| **सुचारुपङ्कजम्** | – | सुचारूणि पंकजानि येषु तत् (बहुव्रीहि) |
| **सपद्मः** | – | पद्मेन सह वर्तमानः (सहार्थ बहुव्रीहिः) |

## अभ्यासः ( मौखिकः )

**1. अधोलिखितानां प्रश्नाम् उत्तराणि वदत–**

(क) प्रकृते: उपकरणानि कथं प्रकल्पितानि?

(ख) प्रकृतिवर्णनं कुत्र आवश्यकम्?

(ग) वाल्मीकि: कं सरोवरं वर्णयति?

(घ) ज्येष्ठमासस्य मध्याह्न: केन वर्णित:?

(ङ) जलाशयेषु कमलानां वर्णनं क: करोति?

## अभ्यासः ( लिखितः )

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां पूर्णवाक्येन लिखत–**

(क) अन्नं कथं भवति?

(ख) संस्कृतकाव्येषु नदीनां वर्णनं किमुद्देश्यकम्?

(ग) प्रकृतिवरदानं किम्?

(घ) शाकुन्तले नाटके किं वर्ण्यते?

(ङ) पर्यावरणस्य स्वास्थ्यं प्रति के जागरूका:?

**2. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत–**

(क) पर्यावरणस्य किं स्वरूपम्?

(ख) ओषधयो देव्य: कुत्र कथञ्च स्तूयन्ते?

(ग) संस्कृतकाव्येषु प्रकृते: केषाम् उपादानानां वर्णनं भवति?

(घ) वृक्षारोपणं पुण्यं कथम्?

(ङ) कालिदासमतेन वसन्ते किं भवति?

## 3. अधोलिखितकथनेषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–

(क) संस्कृतसाहित्ये पर्यावरणस्य चर्चा अस्ति।

(ख) पर्जन्यो वेदे स्तूयते।

(ग) मेघः पृथिवीं जलेन रक्षति।

(घ) पृथिवी सर्वेभ्यः अन्नं ददाति।

(ङ) वेदे ओषधयो देव्यः स्तूयन्ते।

(च) संस्कृतमहाकाव्येषु प्रकृतिवर्णनम् आवश्यकम्।

## 4. कोष्ठकाद् उचितं पदं चित्वा रिक्तस्थानानि पूरयत–

(क) इरा विश्वस्मै ........................ जायते। (**देवाय/ भुवनाय**)

(ख) ता नो ........................ अंहसः। (**गच्छन्तु/ मुञ्चन्तु**)

(ग) वाल्मीकिः ........................ पम्पां वर्णयति। (**सरोवरश्रेष्ठां/ नदीश्रेष्ठाम्**)

(घ) सर्वं प्रिये ........................ वसन्ते। (**निम्नतरं/ चारुतरम्**)

(ङ) मृगकुलं ........................ अभ्यस्यतु। (**पाठं/ रोमन्थम्**)

(च) स्वयं न ........................ पिबन्ति नद्यः। (**दुग्धानि/ वारीणि**)

## 5. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा पूर्ववर्णं परवर्णञ्च निर्दिशत–

यथा– **बालकस्तु** = **बालकः** + **तु**। ( **अः** + **त्** )

1. **कालिदासस्तु** = .................... + ....................
2. **वृक्षास्तु** = .................... + ....................
3. **कन्याश्च** = .................... + ....................
4. **पठितस्तेन** = .................... + ....................
5. **मुहुस्ताडितम्** = .................... + ....................
6. **मानवश्च** = .................... + ....................

**6. अधोलिखितपदेषु मूलशब्दं विभक्तिं वचनं च लिखत–**

| | | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| यथा– | **वैज्ञानिके** | वैज्ञानिक | सप्तमी | एकवचनम् |
| 1. | पर्यावरणम् | | | |
| 2. | साहित्ये | | | |
| 3. | भुवनाय | | | |
| 4. | सर्वेभ्यः | | | |
| 5. | स्वरूपेषु | | | |
| 6. | वृक्षान् | | | |

**7. अधोलिखित क्रियापदेषु धातुं, लकारं, पुरुषं वचनञ्च निर्दिशतः–**

| | | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| यथा– | कथयति | कथ् | लट् | प्रथमपुरुष | एकवचन |
| 1. | भवति | .......... | .......... | .......... | .......... |
| 2. | रक्षति | .......... | .......... | .......... | .......... |
| 3. | कुर्वन्तु | .......... | .......... | .......... | .......... |
| 4. | मुञ्चन्तु | .......... | .......... | .......... | .......... |
| 5. | आसन् | .......... | .......... | .......... | .......... |

**8. उदाहरणमनुसृत्य प्रत्येकम् अव्ययपदेन वाक्यद्वयं रचयत–**

1. अधुना - अधुना पर्यावरणस्य चर्चा भवति।
2. अत्र - अत्र पर्यन्यदेवः स्तूयते।
3. इति - जलं शुद्धं पेयञ्च तिष्ठेत् इति समस्या अस्ति।

## योग्यता-विस्तारः

वृक्षाः पर्यावरणस्य जनकाः सन्ति। अतस्ते अस्माकं वन्दनीयाः। भारतीयायां संस्कृतौ वृक्षाः पूज्याः तेषामुत्पाटनं वर्जितम्। वृक्षारोपणं तद्रक्षणं तु पुण्यतमं मन्यते। तद्यथा–

**दशकूपसमावापी दशवापीसमः ह्रदः ।**
**दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ॥**

**(मत्स्यपुराणम्)**

अन्यत्रापि कथितम्–

**देवलोकगतस्यापि नाम तस्य न नश्यति ।**
**अतीतानागताँश्चैव पितृवंशाँश्च भारत ॥**
**तारयेद् वृक्षरोपी तु तस्माद् वृक्षान् विरोपयेत् ।**
**तस्य पुत्रा भवन्त्येव पादपानामसंशयम् ॥**

तुलसीपादपः वायुप्रदूषणम् अपनयति इति निगदितं पुराणेषु–

**तुलसी कानने चैव गृहे यस्यावतिष्ठते ।**
**तद्गृहं तीर्थमित्याहुः नायान्ति यमकिंकराः ॥**
**तुलसीगन्धमादाय यत्र गच्छति मारुतः ।**
**दिशो दश पुनात्याशु भूतग्रामाँश्चतुर्विधान् ॥**

**(पद्मोत्तरखण्डम्)**

तुलसी विषमज्वरं नाशयति–

**पीतो मरीचिचूर्णेन तुलसीपत्रजो रसः ।**
**द्रोणपुष्परसोऽप्येवं निहन्ति विषमं ज्वरम् ॥**